# अष्टाभ्य औशितिसूत्रसमीक्षणम्

**जगन्नाथशर्मासापकोटा**
Department of Vyakaran (Sanskrit Grammar)
Mahesh Sanskrit Vidyapeeth
(Campus), Devghat, Nepal

*Submitted: 20 Nov.2025*
*Reviewed : 11 Dec. 2025*
*Accepted: 23 Dec. 2025*

***DOI:*** *10.3126/kdk.v6i1.90121*

***Corresponding Author:***
*Jagannath Sharma Sapkota*
***Email:*** *ckachal@gmail.com*

**ORCID:***https://orcid.org/0009-0002-0708-7826*

*Copyright 2026 © the Author (s) and the Publisher*

**कौमोदकी**
***Kaumodaki***
**Journal of Multidisciplinary Studies**
A Peer-Reviewed, Open Access Journal
**ISSN :**
2822 - 1567 (Print)
2822 - 1583 (Online)
https://www.nepjol.info/index.php/kdk/about

**Published by :**
Research Management Cell
Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

**सारः** *प्रकृतोऽयं लेख: 'अष्टाभ्य औश्' इति सूत्रम् विषयीकृत्य प्रवर्तते। अष्टन: परयो: जश्शसो: औश् स्यात् इति सूत्रस्य अर्थ:। यथा उदाहरणम् - अष्टौ इति। इह अष्टन्शब्दात् जसि शसि वा विहिते तस्य स्थाने 'औश्' इत्यादेशे शित्वात्सर्वादेशे अष्टौ इति सिद्ध्यति। लेखेऽस्मिन्सोदाहरणमनुवृत्त्यादिकं प्रतिपाद्य सूत्रं सुस्पष्टं परिचाय्य तत: परं सूत्रस्य विशेषा विचारा विचार्यन्ते। तत्र च प्रामाणिकत्वेन प्रौढा ग्रन्था: प्रौढमनोरमा, शब्दरत्नम्, लघुशब्देन्दुशेखर:, महाभाष्यम् इत्यादय आश्रीयन्ते। तत्र च ग्रन्थेषु विद्यमाना विविधा व्याख्या आकलय्य तत्र विद्यमानै: आक्षेपसमाधानादिभि: एतच्छास्त्रीया विविधा विचारा समुपस्थाप्यन्ते। तेषु च विचारेषु प्रथमं सूत्रं परिचाय्य 'औशघौ' इति न्यासेनैव सिद्धौ 'अष्टाभ्य औश्' इति न्यासकरणस्य प्रयोजनं विचार्यते। तदनु च एतस्य शास्त्रस्य अपवादभूतं शास्त्रं किम्? इति विमृश्यते। तदङ्गत्वेन जसि शसि च आत्वविधायकस्य शास्त्रस्याभावेऽपि आत्वप्रवृत्तये प्रयासं प्रमाणञ्च प्रतिपाद्यते। तत्पश्चाच्च स्वरविधायके 'अष्टनो दीर्घात्' इति सूत्रे दीर्घग्रहणस्य प्रयोजनं विचार्य तेन च ज्ञाप्यांशोऽपि प्रकाश्यते। तदङ्गत्वेन च तत्तत्प्रत्ययेषु अष्टन्शब्दस्य स्वरसञ्चारक्रमोऽपि निरूप्यते। अथ परमाष्टन्शब्दे आत्वमिष्यते न वा इति यथाभाष्यं सुस्पष्टं निरूपयिष्यते। अथाष्टाभ्य उङ् इति न्यासेनापि सिद्धौ औश्विधानस्य असाधारणं प्रयोजनम् विचार्य तत्र तत्र विचारेषु ससन्दर्भं ग्रन्थान् प्रमाणीकृत्य चरमे निष्कर्षेण च लेखोऽयं सम्पूर्णतां प्राप्स्यति। एवं विधव्याख्यानेन च सूत्रमिदं सर्वांशत: स्पष्टतां नीयते।*

**शब्दकुञ्जी-** अपवादः, उत्सर्गः, घिसंज्ञा, दीर्घः, लुक्।

## विषयपरिचय:

भगवत्पाणिन्युपज्ञेऽष्टके सप्तमाध्यायस्य प्रथमपादस्य एकविंशतितमं वर्तते सूत्रमिदम्। सूत्रमिदं विविधेषु व्याख्यानेषु विविधै: विचारै: व्याख्यातमित्यत: बहुविषयकत्वात् क्लिष्टत्वाच्च प्रायश आधुनिकै: व्याख्यातृभि: सर्वांशतोऽविचारितमिति कारणादपूर्वत्वेनायं

लेख: एतत्सूत्रीयसकलव्याख्येयविषयसंग्राहक: नितान्तमौचित्यं महत्त्वं च भजते।

सूत्रेऽत्र 'जश्शसोः शिः' (पा. सू. ७।१।२०) इति सूत्राज्जश्शसोरिति पदमनुवर्तते। 'अष्टाभ्य' इति च पञ्चमीनिर्देशः 'तस्मादित्युत्तरस्ये'ति सूत्रमुपस्थापयन्नष्टन्शब्दाव्यवहितोत्तरत्वविशिष्टस्य कार्यभाक्त्वं बोधयति। एवञ्च सूत्रार्थ एवं भवति- अष्टन्शब्दाव्यवहितोत्तरत्वविशिष्टयोः जश्शसोरौशिति। औशि शित्करणादेव 'अनेकाल्शित्सर्वस्य'(पा. सू. १।१।५५) इति सूत्रेणायं सर्वादेशो ज्ञायते। तथा चोदाहरणम्'अष्टा'विति। अष्टन्शब्दाज्जशि शसि वानुबन्धलोपे 'अष्टन् असि'त्यवस्थायाम् 'अष्टन आ विभक्तौ' (पा. सू. ७।२।८४) इति सूत्रेण नकारस्य आत्वे 'अष्ट आ असि'त्यत्र कृतात्वादष्टन्-शब्दात् परयोः जश्शसोः 'अष्टाभ्य औश्' इति सूत्रेण औशादेशे 'अष्ट आ औ' इति जाते पूर्वं सवर्णदीर्घे तदनु वृद्धौ 'अष्टा'विति रूपं सिद्ध्यति। सूत्रमिदमौश्विधायकं येन नाप्राप्तिन्यायेन 'षड्भ्यो लुगि'त्यस्यौवापवादभूतम्, न तु 'सुपो धातुप्रातिपदिकयोः'(पा. सू. २।४।७१) इत्यस्येति 'अष्टा' इत्यत्र लुकं प्रबाध्यौश्त्वम् 'अष्टपुत्रः' इत्यत्र 'अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते' इत्यौश्त्वं प्रबाध्य लुक्च सिद्ध्यति। अनुपदमेव च एतैर्विचारैः सूत्रमिदं स्पष्टं प्रकाशयिष्यते।

**लेखसमस्या:**

नापूर्वमिदं वचो यत्शास्त्रस्मरणपूर्वकं तदनुसन्धानपुरस्सरञ्च कृतः साधुशब्दप्रयोग एव विशिष्टं फलं जनयति। तथा च प्रमाणम्–'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति'( *पतञ्जलिः*, ई. २०२३, पृ. ८४) श्रुतिरेव। शब्दसाधुत्वविषयकविचिकित्सायाञ्च मुनित्रयोक्तिरेव प्रमाणपदवीमधिरोहति, नान्यदिति तद्वार्तिकभाष्यानुगुणं तत्सूत्रार्थविवरणं शब्दसाधुत्वज्ञानाय सर्वादौ विधेयम्। तदेव च निखिलसाधुशब्दान्वाख्यानोपयोगीत्यत्र नास्ति विप्रतिपत्तिलेशोऽपि। स्थितेऽस्मिन्नष्टन्शब्दविषये जश्शसोरात्वमविधाय पुनः दीर्घनिर्देशेन आत्वघटिताष्टन्शब्दोद्देशेनौश्त्वविधानं पाणिनेराकूतं किञ्चिदस्तीति दृढं स्पष्टयति। परमत्र नानाविधव्याख्यानभेदेन विविधविवक्षितार्थलाभेनातिदुरूहत्वाच्च स्वरादिविषयगुम्फितत्वेन परिष्कृतसूत्रार्थप्रतिपादनद्वारा मुनित्रयाभिमतसिद्धान्तप्रतिपादनं नितान्तमावश्यकमिति कौमुदीसशब्दरत्नप्रौढमनोरमाशेखरमहाभाष्यप्रदीपोद्योतादिग्रन्थावलोकनपूर्वकं पूर्वपक्षाभिप्रायविशदनसहितं सिद्धान्तमतस्य विवेचनं लेखेऽस्मिन्क्रियते। अस्माच्च लेखात्पूर्वं समुपस्थिताः समस्या इमाः सन्ति–

क) औश्त्वविधायकं सूत्रं किमवादभूतम् ?

ख) अष्टाभ्य इति दीर्घनिर्देशस्य जश्शसोर्विषये आत्वज्ञापकत्वं कथम् ?

ग) 'षट्त्रिचतुर्भ्यो हलादि'रिति सूत्रे हलादिग्रहणप्रयोजनं किम् ?

घ) 'अष्टनो दीर्घादि'ति सूत्रे दीर्घग्रहणस्य ज्ञापकत्वं स्वांशे प्रयोजनत्वञ्च कथम् ?

**लेखोद्देश्यम्**

उपर्युक्तसमस्यानां समाधानमेव लेखस्यास्य प्रमुखमुद्देश्यमस्ति। तथा च लेखस्यास्य प्रमुखान्युद्देश्यानि –

क) औश्त्वस्य 'षड्भ्यो लु'गित्येतदपवादप्रतिपादनम्।

ख) दीर्घग्रहणस्य ज्ञापकत्वप्रतिपादनं सिद्धान्तमतसमीक्षणञ्च ।

ग) 'षट्त्रिचतुर्भ्यो हलादि'रिति सूत्रे हलादिग्रहणसार्थक्यप्रतिपादनम् ।

घ) प्रकृतसूत्रे कृतात्वनिर्देशप्रयोजनविचारणम् ।

**अध्ययनविधिः**

प्रस्तुतशोधकार्ये सन्दर्भे विश्लेषणविधिः, तुलनात्मकविधिश्चाश्रितो विद्यते। एवं सिद्धान्तप्रतिपादनावसरे तुलनात्मकविधिः, विवरणात्मकशैल्या समीक्षणात्मकश्च विधिः समाश्रितो वर्तते।

**सामग्रीसङ्कलनप्रस्तुतिः**

'अष्टाभ्यः औशि'ति सूत्रमादाय प्रस्तुतेऽस्मिन्विषये प्रस्तुतशोधकार्यस्य सम्पादनाय श्रीमद्भट्टोजिदीक्षितकृतप्रौढमनोरमा, तट्टीकाभूतशब्दरत्नं नागेशभट्टविरचितशेखरलघुमञ्जूषादीनां ग्रन्थानां, तद्व्याख्यानग्रन्थानाञ्च लेखसामग्रीरूपेण सङ्कलनं कृतं वर्तते। एवमेव वाक्यपदीयम्, प्रदीपोद्योतसहितमहाभाष्यम्, काशिकादिग्रन्थाश्चात्र लेखे सहायकरूपेणोपयुक्ता वर्तन्ते।

**सूत्रसमीक्षणम्**

अष्टौ' इत्यत्र 'अष्टन् अस्' इत्यवस्थायां अष्टन्-शब्दो नान्तत्वसमानाधिकरणसंख्यावाची वर्तते इत्यस्य षट्संज्ञायां 'षट्संज्ञकात् परयोः जश्शसोर्लु'गित्यर्थकेन 'षड्भ्यो लुगि'ति(पा. सू. ७।१।२२)सूत्रेण लुक् स्याद्, तथा च विहिते लुकि जश्शसोरौश्दुर्लभ इति चेत्तत्रोच्यते- अत्र 'अष्टाभ्य औश्' इति सूत्रं 'षड्भ्यो लुक्' इति सूत्रस्यापवादभूतं भवति, औश्विधानसामर्थ्यादिव। एवञ्चानेन सूत्रेण 'षड्भ्यो लुक्' इति प्राप्तं लुकं प्रबाध्य औश्-विधीयते इति 'अष्टा'विति रूपं सिद्ध्यति। तदनु 'अष्टपुत्रः' इत्यत्र 'अष्टौ पुत्राः यस्य' इति बहुव्रीहिसमासे सुब्लुकि अष्टपुत्र-शब्दो निष्पद्यते। अत्र समासे 'अष्टन् जस् पुत्र जस्' इत्यलौकिकविग्रहवाक्ये समासे 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुगिष्यते, परन्तु यथा 'अष्टाभ्य औश्' इति सूत्रं स्वविषये प्राप्तं 'षड्भ्यो लुक्' इति सूत्रं बाधते तथैव 'सुपो धातुप्रातिपदिकयोः' इति सूत्रमपि बाधेत अपवादत्वात् ,तथा च औशादेशे सति 'अष्टौपुत्रः' इति अनिष्टरूपापत्तिः स्यादिति चेत् अत्र समाधानरूपेण एवं श्लोकवार्तिकमभिहितमस्ति-

**'औशघावस्तु लुक्तत्र षड्भ्योऽप्येवं प्रसज्यते।**
**अपवादो यस्य विषये यो वा तस्मादनन्तरः ॥'** (*पतञ्जलिः*, ई. २०२३, पृ. २३)

अत्र पञ्चांशाः सन्ति -'औशघौ' इति प्रथमोंऽशः, 'अस्तु लुगत्र' इति द्वितीयोंऽशः, 'षड्भ्योऽप्येवं प्रसज्यते' इति तृतीयोंऽशः, 'अपवादो यस्य विषये' इति चतुर्थोंऽशः, 'यो वा तस्मादनन्तरः' इति पञ्चमोंऽश इति।

***उत्सर्गापवादभावविचारः***

तत्रादौ 'औशघौ' इत्युक्ते अघौ नाम अनुत्तरपदे इत्यर्थः। घिशब्दः उत्तरपदपर्यायः पूर्वाचार्याणां संज्ञा। तथा च औशादेशः अनुत्तरपदे भवति इत्यर्थः। एवञ्च अत्र 'अष्टपुत्रः' इत्यत्र पुत्रेति उत्तरपदपरकत्वमस्ति इत्यतः अत्र औशादेशो न भवतीति समाधानमौशघाविति प्रथमांशेनाभिहितम्। तदन्वेवं तर्हि वचनं कर्तव्यमिति चेन्नकर्तव्यमित्याशयेन वार्तिकाचार्यैरुक्तम्- अस्तु लुक् तत्र इत्युक्ते तत्र 'अन्तरङ्गानपिविधीन् बहिरङ्गो लुग्बाधते' (श्रीनागेशः, ई. १९५५, पृ.२३७) इति परिभाषया लुगेव भविष्यतीत्याशयः। तत्र येन नाप्राप्तिन्यायेन षड्भ्यो लुक एवायमपवादः, न तु समासलुक इत्याशयेनैवमुक्ते तदाशयमजानान एकदेशी शङ्कते- षड्भ्योऽप्येवं प्रसज्यते इति। इदानीमन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इत्युच्यते चेत्तर्हि षड्भ्योऽपि औशादेशं प्रबाध्य लुगेव स्यादिति शङ्का। तत्र समाधानमुक्तम्- 'अपवादो यस्य विषये' इत्येवमग्रे तृतीयोंऽशेन। यस्य विषये अपवादो भवति तस्य बाधो भवति न त्वन्यस्य। तत्र चेदम् 'अष्टाभ्य औश्' इति सूत्रं 'षड्भ्यो लुक्' इति सूत्रस्यैवापवादभूतं भवति, न तु 'सुपो धातुप्रातिपदिकयोः' इत्यस्य। कथमिति चेत् 'षड्भ्यो लुक्' इत्यस्य अप्राप्तियोग्यस्थले 'अष्टाभ्य औश्' इति सूत्रस्यापि अचारितार्थ्यमस्ति, किन्तु 'सुपो धातुप्रातिकयोः' इत्यस्य अप्राप्तियोग्येऽपि 'अष्टाभ्य औश्' इत्यस्य चारितार्थ्यमेवास्ति। तथा हि- अपवादशास्त्रं **स्वीयोद्देश्यतावच्छेदकव्यापकीभूतोद्देश्यतावच्छेदकस्यैव उत्सर्गशास्त्रस्य बाधकं भवति न तु यस्य कस्यापि उत्सर्गस्य**, यथा-'कुप्वोः कःपौ च' इति सूत्रं सस्यैवापवादभूतन्न तु विसर्जनीयस्य। तदुक्तं कौमुद्याम्- **'कुप्वोः कः पौ च' इति शास्त्रं येन नाप्राप्ति० न्यायेन 'विसर्जनीयस्य सः' इत्यस्यैव अपवादः न तु 'शर्परे विसर्जनीयः' इत्यस्य, तेन वासः क्षौममित्यादौ विसर्ग एव भवति न तु जिह्वामुलीय इति**। (कौमुदी, ई. २०१७, पृ. १९) अयमत्राशयः- 'विसर्जनीयस्य सः' (पा. सू. ८।३।३४) इति सूत्रेण खर्परकविसर्गस्य सत्वं विधीयते। 'शर्परे विसर्जनीयः' (पा. सू. ८।३।३५) इत्यनेन तु शर्परकखर्परकविसर्गस्य विसर्गादेशो विधीयते। तत्र 'कुप्वोः कःपौ च' इत्यनेन जिह्वामूलीयोपध्मानीयौ भवतः। नन्वत्र 'कुप्वोः कःपौ च' (पा. सू. ८।३।३७) इति शास्त्रं 'विसर्जनीयस्य सः' इत्यस्य अपवादभूतम् आहोस्वित् 'शर्परे विसर्जनीयः' इत्यस्य इति विचारः तत्र प्रक्रान्तः । यतो हि कःकरोति इत्यत्र 'विसर्जनीयस्य सः' इत्यनेन विसर्गे प्राप्ते तत्र 'कुप्वोः कःपौ च' इति सूत्रमपि प्राप्तम्। यतो हि कवर्गपवर्गपरकविसर्गस्तत्र वर्तते। एवमेव वासः क्षौममित्यत्र 'शर्परे विसर्जनीयः' इत्यनेन विसर्गस्य विसर्गादेशः प्राप्तः । तत्रापि 'कुप्वोः कःपौ च' इति सूत्रेण जिह्वामूलीयोपध्मानीयौ प्राप्तौ, तत्रेदानीं शास्त्रद्वयविषये विधीयमानौ जिह्वामूलीयोपध्मानीयौ कस्य बाधकौ भवत इति चेत्- 'स्वीयोद्देश्यतावच्छेदकव्यापकीभूतोद्देश्यतावच्छेदकस्यैव सामान्यशास्त्रस्यैव बाधकं भवति। स्वपदेन 'कुप्वोः कःपौ च' इति सूत्रं ग्राह्यम्। यथा स्वं= कुप्वोः कःपौ च इति सूत्रं स्वीयोद्देश्यम् कवर्गपवर्गपरकविसर्गः, तन्निष्ठोद्देश्यता तादृशोद्देश्यतावच्छेदकं कवर्गपवर्गपरकविसर्गत्वं तादृशोद्देश्यतावच्छेदकव्यापकीभूतमुद्देश्यतावच्छेदकं खर्परकविसर्गत्वं भवति न तु शर्परकखर्परकविसर्गत्वम्। यतो हि व्यापकीभूतत्वन्नाम तदधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम्, प्रतियोगितानवच्छेदकत्वमिति यावत् । अत्र च स्वीयोद्देश्यतावच्छेदकमित्युक्ते कवर्गपवर्गपरकविसर्गत्वं, तदधिकरणमित्युक्ते कःकरोति ,वासःक्षौममित्यादिप्रयोगः । तद्वृत्त्यत्यन्ताभावः इत्युक्ते उदासीनोऽत्यन्ताभावः, न तु खर्परकविसर्गाभावः। यतो हि कःकरोति ,वासः क्षौममित्यत्र खर्परकविसर्गस्यैव सत्त्वात् खर्परकविसर्गो नास्ति इत्याकारकः प्रतीतिसाक्षिकः अत्यन्ताभावः अप्रसिद्ध एव। एवञ्च अभावप्रतियोगित्वमुदासीने अन्यस्मिन्। अप्रतियोगित्वं तु खर्परकविसर्गत्वे एव आगच्छति इति

एतादृशव्यापकीभूतोद्देश्यतावच्छेदकं खर्परकविसर्गत्वं भवति। अतस्तादृशव्यापकीभूतोद्देश्यतावच्छेदकस्य 'विसर्जनीयस्य सः 'इति शास्त्रस्यैवानेन शास्त्रेण बाधो भवति, न तु 'शर्परे विसर्जनीयः' इत्यस्य। यतो हि 'शर्परे विसर्जनीयः' इत्यस्य उद्देश्यतावच्छेकं वर्तते शर्परकखर्परकविसर्गत्वं, तत् स्वीयोद्देश्यतावच्छेदकं यत् कवर्गपवर्गपरकविसर्गत्वन्तस्य व्यापकीभूतं न भवति। यतो हि कवर्गपवर्गपरकविसर्गत्वस्य अधिकरणे 'कः करोति', 'नृः पाहि' इत्यादौ शर्परकखर्परकविसर्गत्वं नास्ति। एवञ्च तदधिकरणवृत्तिर्योऽत्यन्ताभाव इत्युक्ते शर्परकखर्परकविसर्गाभावः, तत्प्रतियोगित्वमेव शर्परकखर्परकविसर्गे आगच्छति,न तु अप्रतियोगित्वमिति 'शर्परे विसर्जनीयः' इत्यस्य बाधो न भवति, अपि तु 'विसर्जनीयस्य सः' इत्यस्यैव बाधो भवति। अत एव 'कः करोति' इत्यत्र तु 'विसर्जनीयस्य सः' इति सूत्रं प्रबाध्य अनेन जिह्वामूलीयो विधीयते। वासः क्षौममित्यादौ तु 'शर्परे विसर्जनीयः' इति सूत्रमेव प्रवर्तते इति विसर्गस्य विसर्ग एव आदेशो भवति। तथैवात्रापि 'अष्टाभ्य औश्' इति सूत्रं स्वीयोद्देश्यतावच्छेदकव्यापकीभूतोद्देश्यतावच्छेदकस्य षड्भ्यो लुक एव बाधकं भवति। अत्र च 'अष्टाभ्य औश्' इति सूत्रस्य उद्देश्यतावच्छेकं अष्टन्शब्दाव्यवहितोत्तरत्वजश्शस्त्वम्, तद्व्यापकीभूतोद्देश्यतावच्छेदकमित्युक्ते षट्संज्ञक-अव्यवहितोत्तरत्वविशिष्टजश्शस्त्वं भवति। यतो हि यत्र यत्र अष्टन्शब्दाव्यवहितोत्तरत्वविशिष्टजश्शस्त्वं तत्र तत्र षट्संज्ञकशब्द-अव्यवहितोत्तरत्वविशिष्टजश्शस्त्वं वर्तत एव। एवञ्च तादृशोद्देश्यतावच्छेदकशास्त्रमित्युक्ते 'षड्भ्यो लुगि'ति शास्त्रं भवति। तथा च अस्यैव शास्त्रस्य बाधो भवति, न तु 'सुपो धातुप्रातिपदिकयोः' इति सूत्रस्य। यतो हि 'सुपो धातुप्रातिपदिकयोः'इति सूत्रस्य उद्देश्यतावच्छेदकं वर्तते धातुप्रातिपदिकावयवसुप्त्वम्, तच्च उद्देश्यतावच्छेदकं स्वीयोद्देश्यतावच्छेदकव्यापकीभूतं न भवति। यतो हि स्वीयोद्देश्यतावच्छेदकं वर्तते यत् अष्टन्शब्दोत्तरत्वविशिष्टजश्शस्त्वं तदधिकरणे 'अष्टन् जश्'इत्यत्र धातुप्रातिपदिकावयवसुप्त्वं नास्तीति 'अष्टाभ्य औश्'इतिसूत्रं 'सुपो धातुप्रातिपदिकयोः'इत्यस्य अपवादभूतं न भवति किन्तु 'षड्भ्यो लुक्'इत्यस्य।'सुपो धातुप्रातिपदिकयोः'इति लुक् तु अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इति न्यायेन 'अष्टाभ्य औश्' इति सूत्रं बाधत एव। तथा च अष्टौ पुत्राः यस्य सः अष्टपुत्रः इत्यादौ 'सुपो धातु॰'ति लुगेव भवति। 'अष्टौ' इत्यादौ तु 'षड्भ्यो लुक्' इति शास्त्रं प्रबाध्य 'अष्टाभ्य औश्' इत्यनेन औश् विधीयत इति सर्वत्र इष्टा व्यवस्था सिद्ध्यति। अयमेवापवादः यस्य विषये इत्यंशेन उच्यते।

अनन्तरं बाध्यसामान्यचिन्तामाश्रित्य समाधानान्तरमप्युक्तम्- 'यो वा तस्मादनन्तरः' इत्यंशेन। अर्थात् 'अष्टाभ्य औश्' इति सूत्रेण 'षड्भ्यो लुक्' इति सूत्रस्य बाधो भवति, आहोस्वित् 'सुपो धातुप्रातिपदिकयोः'इतिसूत्रस्य बाधो भवतीति चेद् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इत्यनया परिभाषया स्व-अनन्तरस्यैव शास्त्रस्य बाधो भवति। तथा चात्र 'सुपो धातुप्रातिपदिकयोः'इति द्वितीयाध्याये वर्तते, 'षड्भ्यो लुगि'ति शास्त्रन्तु सप्तमाध्याये वर्तते। इदञ्च 'अष्टाभ्य औश्' इति सूत्रं सप्तमाध्यायस्य मध्यस्थं सूत्रं भवतीति स्व-अनन्तरभूतस्य 'षड्भ्यो लुक्'इत्यस्यैव बाधो भवति, न तु स्वाननन्तस्य 'सुपो धातुप्रातिपदिकयोः' इत्यस्य। तथा च सकलापीष्टा व्यवस्था सिद्ध्यति। इदं सर्वञ्च अत्र श्लोके महाभाष्ये महाभाष्यकारैरुक्तमस्ति-

**औशघावस्तु लुक् तत्र षड्भ्योऽप्येवं प्रसज्यते।**

**अपवादो यस्य विषये यो वा तस्मादनन्तरः ॥इति॥**(*पतञ्जलिः*, ई. २०२३, पृ. २३)

***औशात्वयोरेकपक्षीयत्वनिरूपणम्:***

ननु 'षड्भ्यो लुक्'इति शास्त्रं प्रबाध्य सर्वत्र औश् विधीयत इत्युच्यते चेत्, सर्वत्र लुकं प्रबाध्य औशेव भवति। तथा च 'अष्टौ पश्यन्ति' 'अष्टौ पश्य' इति प्रथमा-द्वितीयाविभक्त्योः रूपद्वयं सिद्ध्यति, परन्तु तत्र 'अष्ट पश्यन्ति', अष्ट पश्य इति रूपेऽपीष्येते। तयोः रूपयोः का गतिः ? यतो हि अत्र सर्वत्र औशेव भवति चेत्तदघटितं रूपं न स्यादेवेति चेत्तत्र समाधानमुक्तम्- **'आत्वं यत्र तत्र औश्त्वं यथा तथा ह्यस्य ग्रहः कृत इति।'** (*पतञ्जलिः*, ई. २०२३, पृ. २५) तथा च यस्मिन्पक्षे आत्वं नास्ति, तस्मिन् पक्षे औश्त्वमपि नेति फलितम्। एवञ्च 'अष्टाभ्यः औश्'इति सूत्रेणात्र औश् विधीयते, तत्र अष्टा इति कृताकारान्तनिर्देशो भवति। तस्मात् कृताकारादेव अष्टन्-शब्दात्परयोः जश्शसोरौश्विधीयते। तथा च यस्मिन् पक्षे आत्वं नास्ति, तस्मिन् पक्षे तु औश् न भवतीति आत्वपक्षे 'अष्टौ पश्यन्ति', 'अष्टौ पश्य' इति रूपम्। आत्वाभावपक्षे तु 'अष्ट पश्यन्ति', 'अष्ट पश्य' इति रूपे सिद्ध्यत एव।

नन्वत्र भवद्भिः यस्मिन् पक्षे आत्वं भवति तस्मिन्पक्षे औश्त्वमित्यवाचि, परन्तु यस्मिन् पक्षे आत्वमिति वक्तुं शक्यते वा ? यतो हि 'अष्टन आ विभक्तौ' इति सूत्रेण अष्टनः नित्यमेव आत्वं विधीयते विभक्तौ परतः। तथा च यस्मिन् पक्षे आत्वं तस्मिन् पक्षे औश्त्वमिति कथम् ? किञ्च भवदुक्तरीत्या अपरोऽपि दोषो भवति- यस्मिन् पक्षे आत्वं, तत्र पक्षे औश्त्वमित्युक्ते आत्वं भवति चेद् औश् भवति इति लभ्यते, परन्तु जश्शसोः आत्वं प्राप्नोति वेति तु विचारणीयम्। तथा हि 'अष्टन आ विभक्तौ' इति सूत्रे 'रायो हलि' इति सूत्रात् हलि इत्यपकर्षः स्वीकर्तव्यः, अन्यथा 'अष्टानाम्' इति न सिद्ध्येत। यतो हि अष्टन् आम् इति जाते यद्यत्र हलि इत्यस्य अपकर्षो न स्यात्तदा 'अष्टन आ विभक्तौ' इति सूत्रेण सामान्यरूपेण विभक्तित्वावच्छेदेनात्वविधानादामि परेऽपि नकारस्य आत्वे जाते अष्ट आ आम् इति जाते इदानीम् अष्ट आ इत्यत्र नान्तत्वं नास्ति, इत्यतः नान्तत्वसमानाधिकरणसङ्ख्यावाचकस्य विधीयमाना षट्संज्ञा न स्यात्। तर्हि षट्संज्ञानिमित्तेन 'षट्चतुर्भ्यश्च' (पा. सू. ७।१।५५) इति शास्त्रेण नुड् न स्यात्। न चात्र एकदेशविकृतन्यायेन(श्रीनागेशः, ई. १९५५, पृ. २०४) नान्तो यः अष्टन्-शब्दः स एवायमिति वाच्यम्। एकदेशविकृतन्यायेनाऽपि छिन्ने पुच्छे शुनि श्वत्वव्यवहारलाभेऽपि पुच्छवत्व-व्यवहारालाभवन्नान्तत्वेऽपगते नान्तत्वसमानाधिकरणसङ्ख्यावाचकत्वरूपषट्त्वस्यालाभात्। नापि स्थानिवद्भावो वक्तुं शक्यः, तादृशनकारविशेषणीभूतनान्तत्वसमानाधिकरणसङ्ख्यावाचकत्वरूपधर्मातिदेशे 'अनल्विधा'विति प्रतिषेधात्। तथा च तत्रात्वे कृते 'अष्टानामि'त्यत्र नुट् न स्यादिति तत्रात्ववारणाय 'रायो हलि' (पा. सू. ७।२।८५) इत्यतो हलीत्यस्यापकर्ष आश्रीयते। एवञ्च नुटः पूर्वं हलादित्वाभावादात्वं न भवत्येवञ्च नुट् सुलभ एव। तथा च तत्र दोषवारणाय हलीत्यपकर्षस्यावश्यमाश्रयणीयतया जश्शसोरात्वं दुर्लभमेव। तथा चात्वपक्षे औशित्येतच्छर्वथासंगतमेवेति प्रश्नः।

***दीर्घग्रहणस्य ज्ञापकत्वनिरूपणम्:***

तत्र 'अष्टनो दीर्घात्'(पा. सू. ६।१।१७२) इति सूत्रे दीर्घग्रहणं ज्ञापकं 'अष्टन आ विभक्तौ' इति विहितमात्वं वैकल्पेन भवतीत्यत्र। तथा हि तेन सूत्रेण 'दीर्घान्तादष्टन्शब्दात्परासर्वनामस्थानविभक्तिरुदात्ता स्या'दित्युच्यते। अष्टाभिरित्युदाहरणम्। यदि अष्टन आत्वन्नित्यं स्यात्तदा सर्वदा तस्य दीर्घान्तत्वेनाव्यावर्तकतया दीर्घग्रहणं व्यर्थमेव स्यात्, तद्धि 'अष्टभिः' इत्यादौ स्वरवारणाय, आत्वस्य वैकल्पिकत्वाभावे तु नित्यमात्वप्रवृत्तेः तद्रूपस्यैवाभावात्तत्र स्वरवारणाय कृतं दीर्घग्रहणं व्यर्थमेवेति भावः। एवञ्च दीर्घग्रहणेनात्वस्य वैकल्पिकत्वलाभाद्यस्मिन्पक्षे आत्वमिति संगच्छत एव। किञ्च यदुक्तं

हलीत्यनुवृत्तेरात्वस्यैव जशशसोः दौर्लभ्यमिति तदपि न, कृताकारादष्टन परयोः जश्शसोरौश्त्वविधानमात्वं विनानुपपन्नं सदेव तयोर्विषये आत्वं ज्ञापयति। तथा च न काचिदसंगतिः। इदन्त्वत्र बोध्यम्- 'अष्टनो दीर्घात्' इति सूत्रस्थं दीर्घग्रहणं 'असति बाधके ज्ञापकानां सामान्ये पक्षपातः' इति न्यायेन श्रुतात्वस्येव अनुमितात्वस्यापि वैकल्पिकत्वं ज्ञापयति। तथा चात्वपक्षे 'अष्टौ पश्यन्ति' 'अष्टौ तिष्ठन्ति' इति रूपे, तदभावपक्षे च 'अष्ट पश्यन्ति' 'अष्ट तिष्ठन्ति' इति रूपे सिद्ध्यत इति सर्वं सुस्थम्।

### *ज्ञापकस्य स्वांशे चारितार्थ्योपादानम्*

नन्विदानीं दीर्घग्रहणं ज्ञापकमात्वं वैकल्पिकं भवतीत्यत्रेति यदुक्तं, तन्न युज्यते। तथाहि आत्वस्य वैकल्पिकत्वे ज्ञापिते यद्यत्र दीर्घग्रहणं न स्यात्तर्हि 'अष्टभिः' इत्यत्रापि अष्टन् स्वरः स्यात्तद्वारणाय दीर्घग्रहणमिति स्वांशे प्रयोजनं वक्तव्यम् । परन्तु तत् प्रयोजनं वक्तुं न शक्यते। यतो हि अत्र अष्टभिरित्यत्र अष्टन्-स्वरं प्रबाध्य 'षट्त्रिचतुर्भ्यो हलादिः'(पा. सू. ६।१।१७९) इति षट्स्वरः प्राप्नोति। तथा हि षट्स्वरोऽष्टन्शब्दभिन्ने षट्संज्ञके चरितार्थः। अष्टन्स्वरस्तु अष्टौ इत्यत्र सावकाशः। यतो हि 'षट्चतुर्भ्यो हलादिः',' झल्युपोत्तमम्' (पा. सू. ६।१।१८०) इति सूत्रद्वयेन हलादिविभक्तावेवं झलादिविभक्तौ परतश्च षट्स्वरो विधीयते इति अष्टौ इत्यत्र न प्राप्नोति। तथा च 'अष्टभि'रित्यत्र परत्वात् षट्स्वरः एव स्यादिति अष्टन्स्वरस्यैवाप्राप्तौ तद्वारणाय कृतं दीर्घग्रहणं व्यर्थमेवेति स्वांशे प्रयोजनं नागच्छतीति कथं ज्ञापकत्वमिति चेत्तत्रोच्यते-अष्टन्-स्वरोऽत्र निरवकाश इति अष्टन्स्वर एव परमपि षट्स्वरं प्रबाध्य स्यादतः दीर्घग्रहणं सार्थकमेव। तत्कथमिति चेत्- अष्टौ इत्यत्र आत्व-औश्त्व-वृद्ध्यादिषु कृतेषु अष्टौ इति जाते तदानीं पूर्वान्तवद्भावेन अष्टन्-शब्दत्वं सम्पाद्यते चेत् ततः परा विभक्तिर्न लभ्यते । परादिवद्भावेन विभक्तित्वमुच्यते चेत् ततः पूर्वम् अष्टन्शब्दो न लभ्यत इति नायं स्वरस्तत्र चरितार्थः । उभयतः आश्रयणन्तु कर्तुं न शक्यते, 'उभयत आश्रयणे नान्तादिवत्' इत्युक्तेः। अयमाशयः-एकस्मिन्नेव अधिकरणे एकस्मिन् एव धर्मिणि विरुद्धधर्मद्वयस्य अतिदेशो न भवतीति एकादेशे पूर्वान्तवद्भावेन एकः धर्मः, परादिवद्भावेन अपरः विरुद्धो धर्मः नातिदेष्टुं शक्यतृ इति। यद्यपि नागेशभट्टैः 'उभयत आश्रयणे नान्तादिवत्' इति परिभाषा नाद्रियते। अतस्मिन् तद्धर्मारोपो ह्यतिदेशः । आहार्यज्ञानमतिदेशात्मकं सर्वदा विरुद्धधर्मारोपमेव। बाधकालीनमिच्छाजन्यं ज्ञानमेव हि आहार्यज्ञानम् । अतो यद्यपि उभयत आश्रयणमन्यत्र कर्तुं शक्यम्, परं व्यपवर्गस्थले त्वत्र नाश्रयितुं शक्यम्। व्यपवर्गः= पौर्वापर्यव्यवहारः । यथैकस्मिन्नेव देवदत्ते यज्ञदत्तत्त्वमारोप्य देवदत्तात् यज्ञदत्तः परः इति व्यवहारो न संभवति ,तथैवात्रापि अष्टन्-शब्दः पूर्वः, ततः परा विभक्तिरिति व्यवहारस्य कर्तुमशक्यत्वात्तदप्राप्तेः अष्टन्-स्वरः सावकाश इति वक्तुं न शक्यते, तथा च निरवकाशत्वादष्टन्स्वरः स्यात्तद्वारणाय दीर्घग्रहणं कर्तव्यमिति स्वांशे चारितार्थ्यमस्त्येवेति भावः ।

अत्र शङ्का- ननु सत्यम्, अष्टौ इति जाते अष्टन् स्वरो न प्राप्नोति। परन्तु वृद्धेः पूर्वं अष्टा औ इत्यास्यामवस्थायां तु प्राप्नोत्येव। यतो हि अष्टन्-शब्दात्परत्वं विभक्तेः अस्ति इत्यतः अष्टन्-स्वरः प्राप्नोति। न च 'अष्ट आ औ' इत्यत्र अष्टन्-स्वरः कथं भवति ? तस्मात्पूर्वन्तु सन्धिकार्यं वृद्धिरेव भवति। यतो हि वृद्धेः प्रवृत्तौ आ औ इति निमित्तम्। स्वरप्रवृत्तौ तु प्रकृतिप्रत्ययसमुदाय इति घटितनिमित्तकं बहिर्भूतनिमित्तकञ्च तद्बहिरङ्गम्, सन्धिकार्यन्त्वन्तरङ्गम्। तथा च अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गमसिद्धं भवतीत्यर्थिकया 'असिद्धं बहिरङ्गमन्तरङ्गे' (श्रीनागेशः, ई. १९५५, पृ. २३७) इति परिभाषया बहिरङ्गस्वरकार्यापेक्षया सन्धिकार्यस्य पूर्वं प्रवृत्तेः अष्टौ इत्येव पूर्वं भवति। तथा च पूर्वोक्तरीत्या स्वरो न भवतीति अष्टन्-स्वरः सावकाशः इति कथमुच्यते ? इति चेत्तत्रोच्यते- तत्रान्तरङ्गादपि सन्धिकार्यात्पूर्वं स्वरप्रवृत्तिर्भवति इति ज्ञाप्यते भाष्यकारैः।

तथा हि 'यद्धि तु परं छन्दसि' (पा. सू. ८।१।५६) इति सूत्रे भाष्ये 'जाये स्वो रोहावेहि' इत्यत्र एहि इत्यत्र स्वरो विचारितः। तत्र 'आ इहि' इति विच्छेदः अस्ति। अत्र अतिङन्तं पदम् 'आ' इति, ततः परं तिङन्तम् इहीति वर्तत इत्यतिङन्तात् पदात्परं तिङन्तं निहन्यते इत्यर्थकेन 'तिङ्ङतिङः' (पा. सू. ८।१।२८) इति सूत्रेण निघातःभवतीत्युक्तम्। तदनु 'लोट् च' (पा. सू. ८।१।५२) इति सूत्रेणेह बाधः कुतो न भवति? तथाहि तेन सूत्रेण गत्यर्थलोटा युक्तः लोडन्तः अनुदात्तो न भवतीत्युच्यते। अत्र इहि इति इण्-गतौ इति धातोः रूपम्। अतः गत्यर्थलोटा युक्तः लोडन्तः इहि इति, तस्य 'तिङ्ङतिङः'इति सूत्रेण प्राप्तः अनुदात्तः प्रतिषिध्येत इति प्रश्ने छान्दसत्वात् निषेधो न भवतीत्युक्तम्। यदि भवद्भिः सन्धिकार्यात्पूर्वं स्वरप्रवृत्तिरिति न स्वीक्रियते अपितु सन्धिकार्यानन्तरमेव स्वरप्रवृत्तिरङ्गीक्रियते तर्हि आ इहि इत्यस्यामवस्थायाम् अतिङन्तात् पदात् परं तिङन्तमस्ति। यद्यपि अत्र निघातोऽपि प्राप्तः, सन्धिकार्यमपि प्राप्तम्। सन्धिकार्यं भवति वा निघातो वा ? इति चेत् इदं स्वरकार्यन्तु पदकार्यं भवति। यतो हि अतिङन्तात् पदात्परं तिङन्तं पदं निहन्यते इत्युक्तेः। तथा च तिङन्तस्य सम्पूर्णस्य अपेक्षा स्वरे अस्ति। सन्धिकार्यन्तु केवलावकारेकारौ अपेक्ष्यत इति तदपेक्षया अस्यैवान्तरङ्गत्वात् पूर्वं भवति। एवञ्च 'एहि' इति कृतसन्धौ अतिङन्तात् पदात् परत्वं तिङन्तपदस्य वक्तुं न शक्यत इति 'तिङ्ङतिङः'इतिस्वरस्य प्राप्तिरेव नास्ति। प्राप्तेरेवाभावे तादृश प्राप्तिमुद्भाव्य अत्र स्वरः प्राप्नोति इत्युक्तं भाष्यकारैः। ततश्च तत्स्वरनिषेधकोपायत्वेन छान्दसत्वं परिगृहीतम्। तथा चैतादृशाशङ्कापरभाष्यं छान्दसत्वरूपतत्समाधानपरभाष्यञ्च असङ्गतमेव स्याद्, अतः तादृशभाष्यात् ज्ञायते यत्-सन्धिकार्यात् पूर्वमेवात्र स्वरस्य प्रवृत्तिर्भवतीति। एवञ्च 'आ इहि' इत्यस्यामवस्थायामेव स्वरः प्राप्नोति। स्वरश्च स इष्यते अतः 'लोट् च' इत्यनेन तस्य निषेधो यथा न स्यात् तदर्थं छान्दसत्वम् भाष्यकारोक्तं संगच्छते। एवमेव 'अष्टौ' इत्यत्रापि सन्धिकार्यात् पूर्वमेव स्वरप्रवृत्तिः स्यात्। तथा च षट्स्वराप्राप्तिस्थलेऽष्टन्-स्वरः सावकाशः। सावकाशश्चेत् 'अष्टभिः' इत्यत्र परत्वात् अष्टन्-स्वरं षट्-स्वरो बाधत इति स्वांशे प्रयोजनं दुर्लभमेवेति ।

***तत्र समाधानम्***

अष्टन्शब्दस्य घृतादिषु पाठेन टकारोत्तरवर्ती अकारः 'घृतादीनाञ्चे'ति (फि. सू. १।२१) उदात्तो वर्तते। तदनन्तरं नकारस्य आत्वमस्तु। आत्वे कृते अयं टकारोत्तरवर्ती अकारः उदात्तः इत्यतः तेन सह जायमानः सवर्णदीर्घरूप आकारोऽपि 'एकादेश उदात्तेनोदात्तः'इति उदात्त एव। पुनश्च 'अष्टा' इति जायमाने आकारेण सह जायमान यो वृद्धिरूप एकादेशः औकारः सोऽपि तेनैव सूत्रेणोदात्त एव भवतीति 'एकादेश उदात्तेनोदात्तः' (पा. सू. ८।२।५) इति सूत्रेणैव उदात्तस्य सिद्धत्वात्तत्स्वरविधानार्थं 'अष्टनो दीर्घात्' इति विहितः अष्टन्स्वरः अनपेक्षित एव। तथा चात्र सूत्रस्यासधारणप्रयोजनालभान्निरवकाशत्वमष्टन्स्वरे आगच्छतिति अष्टभिरित्यत्रापि इदानीं दीर्घग्रहणाभावे षट्स्वरं प्रबाध्य अष्टन्स्वर एव स्यात्। तद्वारणाय दीर्घग्रहणं स्वांशे प्रयोजनवदिति 'अष्टनो दीर्घात्' इति दीर्घग्रहणं जश्शसोर्विषये वैकल्पिकमात्वं ज्ञापयतीति नासमञ्जसम्। ननु अष्ट आ औ इत्यवस्थायां कृते आत्वे तस्य विभक्तिनिमित्तत्वाद्बहिर्भूतनिमित्तकत्वेन बहिरङ्गत्वादन्तरङ्गे सवर्णदीर्घे कर्तव्येऽसिद्धं भवतीति कथमेकादेशप्रयुक्तस्वरसिद्धिरिति वाच्यम्। 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' (श्रीनागेशः, ई. १९५५, पृ. २८४) इति परिभाषया 'अच्सम्बन्धी-अन्य-आनन्तर्यनिमित्तके कार्ये कर्तव्ये जातस्य बहिरङ्गस्य असिद्धत्वं न भवति' इत्यर्थिकयात्र तादृशे 'अकः सवर्णे दीर्घः' इति दीर्घरूपे कार्ये कर्तव्येऽसिद्धत्वाभावबोधनात्।

*तत्र पूर्वपक्ष्याशयः*

नन्वेवमपि प्रियाष्टाभ्य इत्यादौ अष्टन्स्वरस्य सावकाशत्वादिह 'अष्टभि'रित्यत्र परत्वात्षट्स्वरेण बाधः स्यादेव। तथा हि तत्र 'प्रिया अष्टौ ययोस्ताविति' विग्रहेऽन्यपदार्थप्राधान्याच्छंख्यावाचकत्वस्याभावेन षट्संज्ञाभावात् तत्प्रयुक्तमः 'झल्युपोत्तमम्' इति शास्त्रविहितः स्वरो न सिद्ध्यति। तथा च तत्र षट्स्वराप्राप्तिस्थले चरितार्थस्यास्य शास्त्रस्य अष्टभिरित्यत्र परत्त्वात् षट्स्वरेण बाधे पुनः कथं स्वांशे चारितार्थ्यम्? न च 'प्रियाष्टाभ्य' इत्यादौ विशिष्टस्य षट्संज्ञकत्वाभावेऽपि अवयवस्य षट्त्वानपायात्ततः परत्वेन विभक्तेः 'झल्युपोत्तमम्' इति शास्त्रेण स्वरस्य प्राप्त्या निरवकारत्वेनापवादत्वस्य वक्तुं शक्यत्त्वात्'अष्टभि'रित्यादौ दोषः स्यादेवेति तद्वारणाय दीर्घग्रहणस्य स्वांशे चारितार्थ्यं वक्तुं शक्यमिति वाच्यम्, 'चतुरः शसि' (पा. सू. ६।१।१६७) इति सूत्रस्थभाष्यप्रामाण्यात् षट्स्वरविधायकसूत्रे विहितविशेषणस्वीकारेण षड्भ्यो विहिता या विभक्तिः इत्यर्थस्याङ्गीकारेणेह च विशिष्टस्यैव प्रकृतित्वन्न तु तद्धटकस्य केवलस्येति षट्स्वराप्रवृत्तेरष्टन्स्वरस्य सावकाशत्वलाभात्। तथा हि 'चतुरः शसि' शास्त्रेण चतुर्शब्दस्य शसि परतः 'त्रः संख्यायाः' (फि. सू. २।२८) इति शास्त्रेण प्राप्तमाद्युदात्तत्वं बाधित्त्वान्तोदात्तत्वं विधीयते। तत्र सूत्रे भाष्ये एवमाशङ्का कृता- स्त्रीलिङ्गे चतस्रः पश्य इत्यादावपि 'त्रः संख्याया' इति स्वरं प्रबाध्य सः स्वरः स्यात्, इष्यते हि आद्युदात्तत्वस्वर एव इति तदर्थं वार्तिककारैर्वचनमेवारब्धं यत्- 'चतसरि आद्युदात्तत्वनिपातनं करिष्यते इति। अस्यायमाशयः- 'त्रिचतुरोः स्त्रियां तिसृचतसृ' (पा. सू. ७।२।९९) इति सूत्रे चतस्रादेशविधायके चतसृ-शब्द आद्युदात्तत्वविशिष्ट एव पठ्यते। तथा च आद्युदात्तत्त्वनिपातनं 'चतुरः शसि' इति प्राप्तमन्तोदात्तत्वं प्रबाधिष्यते इति। तदनु प्रश्नः कृतः- नन्वेवं यथा निपातनस्वरेण शसि अन्तोदात्तत्वस्वरः बाध्यते तथैव चतसृणामित्यत्रापि 'झल्युपोत्तम'मिति शास्त्रेण प्राप्त उपोत्तमस्वरो बाध्येत, अत्र तु अन्तोदात्तत्वमेवेष्यते, न तु आद्युदात्तत्वम्। परन्तु निपातनस्वरेण बाधे आद्युदात्तत्वस्वरः स्यात् इति चेत् तत्र भाष्यकारैः निगदितम्- 'षट्त्रिचतुर्भ्यो हलादिः' इति शास्त्रे हलादिग्रहणसामर्थ्यात् निपातनस्वरेण विभक्तिस्वरो न बाध्यते इति। अयमत्राशयः- 'षट्त्रिचतुर्भ्यो हलादिः'इत्यत्र हलादिग्रहणं क्रियते। तस्य हि षट्संज्ञकात् त्रिशब्दात् चतुर्-शब्दाद्वा यत्र अजादिविभक्तिरस्ति तत्र स्वरवारणमेव प्रयोजनं वक्तव्यं, परन्तु तत्प्रयोजनं वक्तुं न शक्यते। तथा हि ये षट्संज्ञकाः वर्तन्ते ते नित्यं बहुवचनान्ताः, यतो हि नान्तषान्तसंख्यावाचकानां षट्संज्ञा क्रियते, एकः द्विरित्यनयोश्च नान्तत्वं वा षान्तत्वं वा नास्तीति षट्संज्ञकाः सर्वे बहुत्वसम्पादका एव। एवमेव त्रिशब्दोऽपि नित्यं बहुवचनान्तः एव। तत्र च असर्वनामस्थानविभक्तिषु तृतीयादिषु हलादित्वमव्यभिचरितमिति तत्र हलादिग्रहणस्य प्रयोजनं वक्तुं न शक्यते, नापि शसि प्रयोजनं वक्तुं शक्यम्, तत्र षट्संज्ञकस्थले 'षड्भ्यो लुक्' इत्यनेन लुक् भविष्यति। लुकि सति च तस्मिन् परतः पूर्वस्य स्वरकार्यस्याप्राप्तेः। त्रिशब्दे तावज्जसि तिसृभ्यो जशः इत्यनेन विशेषतः स्वरो विधीयते। शसि तु त्रीन् इत्यत्र एकादेशस्वरो विधीयते, चतुर्-शब्दात् परः यः शस् अस्ति तत्र तु चतुरः शसि इत्यनेन अन्तोदात्तत्वम् विशेषतः एव उच्यते, तथा च हलादिग्रहणाभावेऽपि षट्चतुर्भ्यः इत्येवं कथनेऽपि इदं सामान्यसूत्रं भविष्यति। चतुरः शसि इति विशेषसूत्रमस्ति अतः चतुरः शसि इत्यनेनैव बाधो भविष्यति इति हलादिग्रहणस्य न तत्र वारणं प्रयोजनम्। चतुर्-शब्दे स्त्रियां चतसृ इति आदेशे त्रिशब्दस्य तिस्रादेशे वा जशि सर्वनामस्थानत्वात् असर्वनामस्थानपरा शसादिविभक्तिरेव उदात्ता इत्यर्थकेनानेन स्वरप्राप्तिर्नास्ति। शसि एकम् अवशिष्टम्। तत्र तिस्र इत्यत्र तु 'उदात्तयणो हलपूर्वात्' (पा. सू. ६।१।१७४) इत्येवोदात्तत्वं भवति। एवञ्च तत्र हलादिग्रहणं चतुर्शब्दस्य शसि चतस्र इत्यत्र स्वराप्रवृत्तये विहितम्, यदि तत्रापि निपातनस्वरः विभक्तिस्वरं बाधेत तदा तु हलादिग्रहणं व्यर्थमेव स्यात्, तदेतज्ज्ञापकं भविष्यति- निपातनस्वरेण विभक्तिस्वरो न बाध्यत इत्यत्र। न च अष्टौ इत्यत्र

षट्स्वरस्य व्यावृत्यर्थं हलादिग्रहणमिति वाच्यम्, अष्टौ इत्यत्र षट्स्वरेण विधीयमानमाद्युदात्तत्वस्य पूर्वोक्तरीत्या एकादेशैनैव सिद्धत्त्वात् हलादिग्रहणे कृतेऽपि तस्य स्वरस्य इष्टत्वेन तस्य व्यावृत्तेर्वक्तुमशक्यत्वात्। न च 'कदष्टौ' इत्यत्र कुत्सिता अष्टौ इति विग्रहे कर्मधारयसमासे उत्तरपदार्थस्स्यैव प्राधान्यात् संख्याप्रकारकसंख्येयविशेष्यकबोधजनकत्वस्याहानात् षट्संज्ञायाः सत्वेन षट्स्वरः स्यात्, इत्यते तु अत्र अव्ययपूर्वप्रकृतिस्वर इति अन्तोदात्तत्वव्यावृत्त्यर्थं 'षट्त्रिचतुर्भ्यो हलादिः' इति सूत्रे हलादिग्रहणं चरितार्थमिति वाच्यम्, एतादृशज्ञापनपरभाष्यप्रामाण्येन तथारूपाणामनभिधानात्, तथा च व्यावर्त्याप्रसिद्ध्या हलादिग्रहणं व्यर्थमेव। तथा च व्यर्थं सत् ज्ञापयति न निपातनस्वरेण विभक्तिस्वरो बाध्यते इति। यदि च षट्स्वरविधायकशास्त्रे विहितविशेषणं न स्यात् तदा प्रियाष्टानौ इत्यादौ षट्स्वरस्य प्राप्तौ तद्वारणार्थं हलादिग्रहणं सावकाशं स्यादिति तद्वैयर्थ्यप्रतिपादनप
र्वकज्ञापकत्वप्रतिपादनपरभाष्यासंगत्यापत्तिः। अतस्तद्भाष्यप्रामाण्यात् षट्स्वरे विहितविशेषणस्य लाभेन प्रियाष्टाभ्यामित्यादौ 'झल्युपोत्तमम्' इति शास्त्रस्याप्रवृत्त्या तत्र चाष्टनः इति शास्त्रस्य चारितार्थ्येन अष्टाभिः इत्यत्र परत्वादेव षट्स्वरेणाष्टन्स्वरे बाधिते दीर्घग्रहणस्य स्वांशे चारितार्थ्यं वक्तुं न शक्यम् इति।

***सिद्धान्तिसमाधानम्***

भाष्यकारैः दीर्घग्रहणस्य वैकल्पिकात्वज्ञापकत्वमुक्तम्, किञ्च षट्संज्ञासूत्रभाष्ये आकारान्तस्य षट्संज्ञा च प्रतिपादिता, तादृशभाष्यप्रामाण्यादेव षट्स्वरस्थले इव अष्टन्स्वरस्थलेऽपि 'अष्टनो दीर्घात्' इत्यत्रापि विहितपञ्चमी स्वीक्रियते एव। एवञ्च 'अष्टनो दीर्घात्' इत्यस्यापि प्रियाष्टाभ्यामित्यत्र प्रवृत्तिर्न भवतीति न तत्र सावकाशत्वं वक्तुं शक्यते। तथा च निरवकाशत्वादनेन बाधः स्यात्। अतः 'अष्टभि'रित्यादावष्टन्स्वरवारणाय दीर्घग्रहणस्य चारितर्थ्यं वर्तत एव। वस्तुतस्तु भाष्यकारैः 'षान्ता षट्' (पा. सू. १।१।२४) इति सूत्रे भाष्ये प्रियाष्टादिशब्दानामनभिधानमेव स्वयमुक्तम्। तथा हि तत्र भाष्ये- **'यद्येवं प्रियाष्टौ प्रियाष्टाः इति न सिध्यति। प्रियाष्टानौ प्रियाष्टानः इति प्राप्नोति। यथालक्षणमप्रयुक्ते'**(*पतञ्जलिः*, ई. २०२३, पृ. ३१३) इत्युक्तम्। अप्रयुक्ते लक्षणाभावस्य योग्यतेति तदर्थः। किञ्च 'तिसृभ्यो जसः' (पा. सू. ६।१।१६६) इत्यत्र जस्ग्रहणस्येवात्रापि 'षट्त्रिचतुर्भ्यो हलादिः' इति सूत्रे हलादिग्रहणस्य प्रयोजनं वक्तुं शक्यमिति तस्य ज्ञापकत्वप्रतिपादनपरभाष्यमेकदिश्युक्तमेवेति तदादाय दीर्घग्रहणस्य सावकाशत्वप्रतिपादनं न संगच्छते। एवञ्च दीर्घग्रहणस्यात्ववैकल्पिकत्वज्ञापकत्वं युज्यत इति 'अष्टौ पश्यन्ति, अष्टौ तिष्ठन्ती'त्यात्वपक्षे तदभावपक्षे च 'अष्ट तिष्ठन्ति, अष्ट पश्यन्ति' इति रूपं सिद्ध्यत एवेति बोद्ध्यम्।

***अष्टाभ्य उङिति न्यासविचारः***

नन्वेवमपि 'अष्टाभ्य उङ्' इत्येव न्यस्यताम्, किमौश्विधानेन। तथा हि अष्टा अस् इत्यवस्थायाम्, अनेनोङादेशे 'अलोऽन्त्यस्य' (पा. सू. १।१।५२) इति शास्त्रेणान्त्यस्य स्थानित्वे बोधिते तम्बाधित्वा 'आदेः परस्य' (पा. सू. १।१।५४) इति शास्त्रेण आदिमाकारस्यादेशे प्राप्ते ङित्त्वात् 'ङिच्च' (पा. सू. १।१।५३) इति शास्त्रेणान्त्यस्य सकारस्य स्थाने आदेशोऽयं भविष्यति। तथा च 'अष्ट अ उ' इत्यत्र 'आद्गुणः' (पा. सू. ६।१।८७) इति शास्त्रेण गुणे अष्ट ओ इति जाते 'वृद्धिरेची'ति (पा. सू. ६।१।८८) शास्त्रेण वृद्धौ अष्टाविति रूपसिद्धिरि चेत्तत्रोच्यते- यदि ह्यत्रोङादेशो विधीयेत तदा अष्ट अ उ इत्यवस्थायाम्

पूर्वोपस्थितनिमित्तकत्त्वेन 'आद्गुणः' इति शास्त्रात् पूर्वमेव 'अकः सवर्णे दीर्घः'(पा. सू. ६।१।१०१) इति शास्त्रेण सवर्णदीर्घे अष्टा उ इति जाते गुणे अष्टो इत्येव स्यात्, न तु अष्टौ इतीष्टं रूपमिति तत्साधनाय 'अष्टाभ्य औश्' इति न्यासः।

**निष्कर्षः**

'अष्टाभ्य औशि'ति सूत्रेणानेन 'अष्टौ' 'परमाष्ट'वित्यादावौशादेशो विधीयते। अनेन विधीयमानश्चौशादेशः सर्वत्र विकल्पेनेष्यते। परन्तु सूत्रे विकल्पार्थबोधकपदाभावेनास्य वैकल्पिकत्वालाभः। किञ्च आत्वविधायकसूत्रे हलीत्यनुवृत्तेः जश्शसोरात्वस्यालभादौशपि दुर्लभ इति चेत्तत्र 'अष्टनो दीर्घात्' इति सूत्रस्थं दीर्घग्रहणं ज्ञापकमात्वं वैकल्पिकं भवतीत्यत्र, एवमेवौश्विधायकसूत्रे कृतात्वनिर्देश एव जश्शसोर्विषये आत्वं ज्ञापयति। अनुमितमपीदमात्वं वैकल्पिकमेव व्याख्यानात्। तथा च जश्शसोर्विषये 'अष्टौ, अष्ट' इति रूपद्वयं सिद्ध्यतीति।

**सन्दर्भसूची**

पतञ्जलिः (ई.२०२३). *महाभाष्यम्*. चौखम्बा संस्कृत प्रतिष्ठान।

पाणिनिसूत्रम् (ई.२०२५). *अष्टाध्यायी* (प्राविधिकमाध्यमेन) नीलेश बोडस {ashtadhyayi.com(app)}.

भर्तृहरि (ई.२०२३). *वाक्यपदीयम्*. सुरसरस्वतीभवनग्रन्थमाला।

श्रीकौण्डभट्टः (ई.२०१६). *वैयाकरणभूषणसार*: (व्या., महामहोपाध्यायपेरिसूर्यनारायण). श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः।

श्रीनागेशः( ई.१९४१).*लघुशब्देन्दुशेखर*: (सुब्रह्मण्य शास्त्री, वेङ्कटेश्वरशास्त्री, व्या.). श्रीविद्यामुद्रणालयः।

श्रीनागेशः (ई.१९५५). *परिभाषेन्दुशेखरः*. सरस्वतीमुद्रणालयः।

श्रीनागेशः (ई.२००६). *परमलघुमञ्जूषा*. चौखम्बा सुरभारती प्रकाशन।

श्रीनागेशभट्टः (ई.१९८७). *वैयाकरणसिद्धान्तलघुमञ्जूषा* (व्या.,महामहोपाध्यायपेरिसूर्यनारायण). श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः।

श्रीभट्टोजिदीक्षितः(ई.२००९). *प्रौढमनोरमा* (अव्ययीभावान्ता). चौखम्बा संस्कृत संस्थान।

श्रीभट्टोजिदीक्षितः (ई.२०१७). *सिद्धान्तकौमुदी*. चौखम्बासुरभारतीप्रकाशनम्।